प्रवेश सं० १६००६

विषय: धर्मशास्त्र

क्रम सं०

नाम पराशर स्मृति: ॥२ अध्याय:॥

ग्रन्थकार

पत्र सं० १-६

श्लोक सं०

अक्षर सं० (पंक्तौ) ३८ पंक्ति सं० (पृष्ठे) १०

लिपि: दे.ना.

आधार: का.

आकार: १०.२.×४.२.

वि० विवरणम् पू.

13923

ग, १६२०

पी० एस० यू० पा०--९९ एस० सी० ई०--१९५१--५० ०००

Indira Gandhi National Centre for the Arts

८०॥ ॥श्रीगणेशाय नमः॥ ॥द्विजोकधरमेककृतो विहृतकौस्तुभं मध्यतो रमाचरणपंकजस्खलितया
वकं चान्यतः। सुरोदितसुरेशनिजं सततमीक्षमाणं मुदा सदाभिमतसिद्धये नमत माधवं साधवः॥१॥
धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन। शास्त्रे पराशरकृते विवृतिर्द्वि
तीयाध्याये विधीयत इहोदितहृत्तिसिद्ध्यै॥२॥ ॥प्रथमाध्याये चतुर्णामपि वर्णानामैहिकामुष्मिक
फलहेतुसाधारणासाधारणधर्मा निरूपिताः इदानीं सर्ववर्णानां जीवनहेतुसाधारणधर्मं निरूपयि
तुं द्वितीयाध्यायमारभते॥ तत्राध्यायार्थं प्रतिजानीते॥ ॥अतःपरं गृहस्थस्य कर्माचारं कलौ युगे। धर्मं
साधारणं शक्त्या चातुर्वर्ण्याश्रमागतम्॥१॥ ॥तं प्रवक्ष्याम्यहं पूर्वं पराशरवचो यथा॥ ॥अतःपरं चातु
र्वर्ण्यस्यैहिकामुष्मिकफलहेतुसाधारणासाधारणधर्मनिरूपणानन्तरमैहिकफलहेतुधर्मनिरू
पणेन वृत्तिस्थं गृहस्थस्य गृहस्थस्यैव न ब्रह्मचारिवानप्रस्थसंन्यासिनां कर्मणो जीवनहेतुक्रियाया
आचारः कर्तव्यता तत्र कृषिपदपरित्यागेन यत्कर्माचारपदोपादानं तद्धर्मान्तरेण लौकिकव्यापारः तया

२प.टी. १ अपिकृषेःकलौशास्त्रीयत्वबोधनायकर्म्माचारपदयोर्लौकेलौकिकालौकिकव्यापाराभिधायकत्वा
न्नायुगांतरेष्णुकृषेर्वैश्यमात्रधर्म्मत्वात्सामान्येनगृहस्थाभिधानंकथमित्यतआहकलौयुगइति।कलौ
कृषेस्सर्ववर्णधर्म्मत्वात्।तदेवस्पष्टयतिधर्म्मसाधारणमितिसर्ववर्णसाधारणःकृष्याचारोधर्म्मश्च
शास्त्रा।भ्यनुज्ञातइत्यर्थः।साधारण्येहेतुमाह।शक्त्येति।शक्त्यासामर्थ्येनकलौविप्रादीनांयाजनादिवृ
त्त्याजीवनस्यदुर्लभत्वात्कृष्यादेश्चाल्पयत्नसिद्धत्वादित्यर्थः।चत्वारोवर्णाश्चातुर्वर्ण्यंतस्याश्रमेण
पूर्वपूर्वकलियुगक्रमेण।तंसिद्धं।आश्रमइतिपदच्छेदेचतुर्णामप्याश्रमिणांतत्रापिगृहस्थमात्रपर ५५
त्वेनपूर्वेणपुनरुक्तिश्चेति।तत्पूर्वप्रतिज्ञातंकृषिधर्म्ममहंपराशरःप्रकर्षेणदृष्टादृष्टेतिकर्त्तव्यताप्र
तिपादनपुरस्सरंवक्ष्यामि।श्रोतॄणामात्रमूलत्वशंकामपनुदति।पूर्वेति।पूर्वकल्पीयपराशर
वचनानतिक्रमणेत्यर्थः॥प्रतिज्ञातंधर्म्ममाह॥ ॥षट्कर्म्मसहितोविप्रःकृषिकर्म्मचकारयेत्॥
॥३॥ ॥षड्भिःकर्मभिःपूर्वोक्तैःसंध्यादिभिःसहितोयुक्तोपिविप्रःकृषिकर्मकर्षणमेवकेवलंका

रयेत्कृषिवाणिज्येवास्वयंकर्त्तेइतिगोतमस्मरणाच्चकाराच्चतदभावेस्वयमपिकुर्यात्।तदाहकूर्म्मः॥स्व
यंवाकर्षणंकुर्याद्वाणिज्यंवाकुसीदकम्।कष्टापापीयसीवृत्तिःकुसीदंतांविवर्जयेत्॥बृहस्पतिरपि॥
कुसीदंकृषिवाणिज्यंप्रकुर्वीतस्वयंकृतं।आपत्कालेस्वयंकुर्वाणैनसायुज्यतेद्विजइति।एतेनस्वयं
कर्षणनिषेधोयुगांतरविषयइतिसिद्धं॥ ॥कृषौवर्ज्याश्वलीवर्दानाह॥ ॥क्षुधितंतृषितंश्रांतंब
लीवर्दंनयोजयेत्।हीनांगंव्याधितंक्लीवंवृषंविप्रोनवाहयेत्॥३॥ ॥क्षुधितोबुभुक्षितस्तृषितःपिपा
सितःश्रांतःश्रमातुरः।तंवलीवर्दंहलादिवहनादौनयोजयेत्।हीनांगःपादविकलः।व्याधितोतिसारादि
ग्रस्तःक्लीवःपुंस्त्वरहितस्तमपिनहलादिकंवाहयेत्॥तदुक्तमाश्वमेधिके॥नसुलक्षणमश्रान्तंवाहये
द्विकलेंद्रियामितिएकेनेवशब्देननिषेधद्वयोपादानमल्पतात्पर्यार्थं॥कीदृशस्तर्हियोज्यइत्यतआह॥
॥ ॥स्थिरांगंनीरुजंदृप्तंसुनर्दंषण्ढवर्जितं।वाहयेद्दिवसस्यार्द्धंपश्चात्स्नानंसमाचरेत्॥४॥स्थिरांगं
दोमासोपामयेद्दत्तंदोमासोदोषनोदुहेत्।दोमासावेकवेलायांशेषकालंयथारुचि॥ पश्चात्स्ना

Indira Gandhi National
Centre for the Arts

प्र.दी.
२

शत्याहृदंगांनतुकोमलांगंवत्संत्रपृष्ठंसबलं...णमनड्वाहंतुवाहयेदितिरहस्यशरस्मरणाश्री
नीरुजंनिर्गतारुक्पीडाहलोछहनादावभ्यासवशेनयस्यतंनतुनिर्व्याधिंव्याधितनिषेधेनैवत
त्सिद्धेःदम्यंतारुण्येनस्तुनर्दभनर्दनेनादीनींषंडवर्जितंषंडेदूषभेस्यहर्ष्यासहनेनवर्जितंदूरतःप
रिहृतंनतुषंढत्ववर्जितंक्लीवनिषेधेनैवतदर्थसिद्धेःतंदिवसस्यार्द्धमात्रमध्याह्नंवाहयेत्॥तदुक्तमा
श्वमेधिके॥अक्तःपूर्वेद्युर्यामंवाधुर्याणांवाहनंस्मृतं।विश्रामेन्मध्यमेभागेभागेचांतेयथासुख
मिति।पूर्वप्रहरेप्रहरद्वयंवावाहयित्वामध्येप्रहरेविश्राम्यचतुर्थप्रहरेऽच्छंचेत्यर्थः।बलीवर्दमि ५६
त्यादावेकत्वमविवक्षितंअष्टगवंधर्महलंषड्गवंजीवनार्थिनां।चतुर्गवंनृशंसानांद्विगवंब्रह्मघा
तिनामितिहारीतेनसंख्यांतरविधानात्।दिवसार्द्धमित्युत्सर्गेणकचिदासायमपिवाहयेत्तदुक्त
माश्वमेधिकेयद्वात्वरयाकृत्यंसंशयायत्वथापिवा।वाहयेत्तत्रधुर्याश्चनसपापेनलिप्यतइति॥
इदमप्यष्टगवाभिप्रायेणाद्विगवंवाहयेत्पादंमध्याह्नेतुचतुर्गवंअर्धंतुत्रिपादोक्तंमुख्यमष्टगवंस्मृतं

मित्यपिस्मरणात्।पश्चात्बलीवर्दस्नापनानंतरंस्वयंमाध्याह्निकंस्नानंकुर्यात्।तथाचहारीतः।स्नापयि
त्वानडुहोलंकृत्यब्राह्मणान्भोजयेदिति।मध्यास्नानमित्यत्रप्रातःस्नानमुक्तमत्रतुमाध्याह्निकमिति
नपुनरुक्तिः।प्रातर्मध्याह्नयोःस्नानेवानप्रस्थगृहस्थयोः।यतेस्त्रिषवणंप्रोक्तंसकृत्तुब्रह्मचारिण
इतिदक्षेणगृहस्थस्यस्नानद्वयाभिधानात्।तत्रप्रातःस्नानवदेवनित्यंयथाहनितथाप्रत्नर्नित्यंस्नायाद
नातुरइतिकात्यायनस्मरणात्।तद्विधिमाहसंक्षेपेणयोगयाज्ञवल्क्यः।स्नानमंतर्जलेचैवमार्जनाच
मनेनतथा।जलाभिमंत्रणंचैवतीर्थस्यपरिकल्पनं।अघमर्षणसूक्तेनत्रिरावृत्तेननित्यशः।स्नानाचरण
मित्येतदुपदिष्टंमहात्मभिरिति।मंत्राश्चप्रातःस्नानविधितएवावगंतव्याः।मध्याह्नस्नानानंतरंकृत्यमाह
॥ ॥जप्यंदेवार्चनंहोमंस्वाध्यायंचैवमभ्यसेत्।एकंद्वित्रिचतुरोविप्रान्भोजयेत्स्नातकान्द्विजः॥५॥ ॥
जप्यंमध्याह्नसंध्याप्रधानत्वेनगायत्र्यास्तेनात्रसंध्योपासनमुपलक्ष्यतेतद्विधिश्चप्रायुक्तमंत्रेषुविशे
षमाहनारायणः।आपःपुनंत्विमंत्रेणआपोहिष्ठेतिमार्जनं।प्रक्षिप्यवांजलिंसम्यगुदुत्यंचित्रमित्यपि

Indira Gandhi National
Centre for the Arts

२प॰टी॰ तच्चतुर्विंशतिवर्षं हंसः शुचिषदित्यपि। एतज्जपेदूर्ध्वबाहुः सूर्यं पश्यन्समाहितः। गायत्र्या तु यथाशक्ति उ
३ पस्थाय दिवाकरमिति। देवार्चनं मध्याह्नेपि कर्तव्यमिति पुनरुक्तं। प्रातर्मध्यंदिने सायं विष्णुपूजां समा
रभेदिति शौनकस्मरणात्। होमो वैश्वदेवस्तस्य पुनर्वचनं स्वाध्यायस्य तदुत्तरकालताबोधनार्थं। तदा
ह बृहस्पतिः सद्यावीक्षणात्कार्यः पश्चाद्वा प्रातराहुतेः। वैश्वदेवावसाने वा नान्यदत्तनिमित्ततः इ
ति। स्वाध्यायाभ्यसनं ब्रह्मयज्ञः यस्त्वाध्यायमधीते स ब्रह्मयज्ञ इति स्मरणात्। स चापूर्वो नैव विधीयते किंतु ५७
दिति यथायोग्यं संभवतो एको वा द्वौ वा त्रयो वा चत्वारो वा इत्येकद्वित्रिचतुरसंख्यैव ते विप्राश्चेत्येकद्वि
हि त्रिचतुर्वै आच्छादमः स्वरतोपमान्सातकानन्यान्वा यथाशक्ति भोजयेत् एतच्च विप्रभोजनं कर्षणो
त्थपापक्षयार्थदोषापनयनार्थं विधीयते। अतएव हारीतः। ज्ञापयित्वा तु होतं दत्त्वा ब्राह्मणा
न् भोजयेदिति। ननु यद्दोषापनयनाय प्रत्यहं विप्रभोजनं पास्त्र इत्यत्र नाधान्यानां धर्मोपयोगिता कथ
स्यादित्यत आह॥ ॥स्वयंकृष्टे यथाक्षेत्रे धान्यैश्च स्वयमर्जितैः। निर्वपेत्पंचयज्ञांश्च क्रतुदीक्षां च कारयेत्॥

हा॥ ॥यथा स्वयं शिलोंछादिद्वारा अर्जितैर्धान्यैः श्रौतस्मार्तक्रियानुष्ठानमभ्युदयकारि तथा स्वयं कृषे
पिहेत्रे वकारादृतकादिद्वारा कर्षितेनार्जितैरपत्यैर्धान्यैः पंचमहायज्ञान्निर्वपेत् क्रतूनामग्निष्टोम
दीनां दीक्षां च कारयेत्कुर्यात्। ननु तथैव इष्यार्जनस्य तन्नियमानां वा पुरुषार्थत्वेन तदतिक्रमे पुरुषस्यै
व प्रत्यवायो न क्रतुवैगुण्यमिति प्राप्ते एवं कूर्मपुराणे लब्धलाभः पितॄन्देवान् ब्राह्मणांश्चापि पूजयेत्॥
ते तृप्तास्तस्य तं दोषं शमयंतीति न संशय इत्यर्जकस्यैव दोषमभिधाय तदभाव उपपादितः। वस्तुतस्तु क
लौ कृषेरभ्यनुज्ञातत्वात् कर्षकस्यापि न दोष इति॥ इदानीं कृष्युत्पन्नानां धान्यानां धनार्थं विक्रये विशे
षमाह॥ ॥तिलारसा न विक्रेया विक्रेया धान्यतत्समाः। विप्रस्यैवंविधा वृत्तिस्तृणकाष्ठादिविक्रयः॥
॥७॥ तिलाः प्रसिद्धाः श्वेताश्वादिविशेषात् रसा गुडादयस्ते मूल्यकल्पनया धनेन न प्रणनीयाः यदि धान्या
न्तररहितस्यापि तिलादिविक्रयमंतरेण दृष्टादृष्टकार्यं न सिध्येत्तर्हि धान्यतो धान्येन समा तिलप्रस्थेन
धान्यप्रस्थ इति प्रक्रियया विक्रेया विमातव्याः तदाह नारदः। अशक्तो भेषजस्यार्थे यज्ञहेतोस्तथैव वा॥

Indira Gandhi National
Centre for the Arts

प. टी. ४

यद्यवश्यं तु विक्रेयास्तिला धान्येन तत्समाः इति । एवं रसादिविनिमयोपि द्रष्टव्यः ॥ तदाहापस्तंबः ॥ अन्नेन
चान्नस्य मनुष्याणां च मनुष्यै रसानां च रसैर्गन्धानां गन्धैर्विद्यया च विद्यानामिति । यत्तु कामं वा कृष्यो
त्पाद्य तिलान्विक्रीणीरन्निति वसिष्ठवचनं तत्कथंचिद्विनिमयासंभवे विक्रयाभ्यनुज्ञार्थम् । अत एव तिल
तंडुलपक्वान्न विद्या मनुष्याश्च विहिताः परिवर्तकेनेति तेनैव परिवर्त्तः पृथगभिहितः । योयं तिलादिवि
निमयस्तृणकाष्ठादिविक्रयश्च सोयमेवंविधो विप्रस्य वृत्तिर्जीवनोपायः । यथाह नारदः ॥ ब्राह्मणस्य
तु विक्रेयं शुष्कदारु तृणादि च इति ॥ इदानीं कर्षकस्य नैमित्तिकं खलयज्ञं विधास्यन्नादौ निमित्तमुप ५८
न्यस्यति ॥ ॥ब्राह्मणश्चेत्कृषिं कुर्यात्तन्महादोषमाप्नुयात् ॥ ॥भूमिकर्षणे तदाश्रितप्राणिहिंसाया अ लि॰
परिहार्यत्वात्सावधानस्यापि कर्षकस्य ब्राह्मणस्य महान्दोषो भवत्येव । ब्राह्मणग्रहणं कृषिहन्तृत्वे वैश्यस्य
तद्दोषाभावबोधनार्थम् । अत एव मनुः । वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्रियोपि वा । हिंसाप्रायां पराधीनां
कृषिं यत्नेन वर्जयेदिति । उभयोरेव तन्निषेधमुक्तवान् । उक्तदोषस्य महत्त्वं विशदयति ॥ ॥संवत्सरेण यत्पा

पं मत्स्यघाती समाप्नुयात् ॥ अयोमुखेन काष्ठेन तदेकाहेन लांगली ॥ ८ ॥ ॥मत्स्यघातेन जीवन्कैवर्त्तादिः
संवत्सरेण यत्पापं प्राप्नोति तदयोमुखेन काष्ठेन हलेन भूमिं भिंदन्नेकाहेन लांगली कर्षकः प्राप्नोति । अ
त एव मनुः । कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता । भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखमिति । कृ
षिनिंदा उक्तदोषस्य कर्षकमात्रेण संक्रान्तिं विशेषमाह ॥ ॥पाशको मत्स्यघाती च व्याधः शाकुनिकस्तथा ।
अदाता कर्षकश्चैव सर्वे ते समभागिनः ॥ ९ ॥ ॥वागुरया मृगग्राही पाशकः मत्स्यघातिनः पुनरुपादानं
पाशकादीनां तत्साम्यबोधनाय । व्याधो मृगवधजीवी । शाकुनिकः पक्षिघाती । अदाता खले राशिमूल
मुपागतेभ्यो ऽप्रदाता । ते सर्वेपि समानप्रत्यवायभागिनः । एवं निमित्तमभिधाय नैमित्तिकमाह ॥ ॥वृक्षं छि
त्वा महीं भित्त्वा हत्वा च कृमिकीटकान् । कर्षकः खलयज्ञेन सर्वपापैः प्रमुच्यते ॥ १० ॥ ॥वृक्षभूमिकृम्यादी
नां छेदनभेदनहननैर्यानि पापानि भवन्ति तेषां सर्वेषां पापानां कर्षकस्य खलयज्ञः प्रायश्चित्तं भवति ॥
खलयज्ञस्वरूपमाह हारीतः । भूमिं भित्त्वौषधीश्छित्त्वा हत्वा कीटपिपीलिकाः । पुनन्ति खलयज्ञेन कर्षका

Indira Gandhi National Centre for the Arts

कृ.टी.
५

असंशयः। भूपोयंनिहितोमध्येमेदिनीमाहिकर्षकैः। तस्मादतंद्रितोदद्याद्धान्यार्थदक्षिणामिति। ख
लयज्ञाकरणेअल्पवायाविनाशमुपसंहरति॥ ॥योनदद्याद्विजातिभ्योराशिमूलमुपागतः। सचोरःस
चपापिष्ठोब्रह्मघ्नंतंविनिर्दिशेत्॥११॥ ॥यःकर्षकोधान्यराशौकृतेसमागतेभ्योविप्रेभ्योवक्ष्यमाणंत्रिंशी
भागंनददातिसचोरोब्रह्मभागहरणात्पापिष्ठःखलयज्ञाकरणात्ब्रह्मघ्नःकृषिव्यासंगेनवेदाध्य
नपरित्यागात्। तदुक्तंशिवपुराणे। अदत्वाकर्षकोदेवियस्तुधान्यंप्रवेशयेत्। तस्यत्वंस्माभिभूतस्यदे
विपापंब्रवीम्यहं। दिव्यंवर्षसहस्रंतुदुरात्माकृषिकारकः। मरुदेशेभवेद्वृक्षःसपुष्पफलवर्जितः। त ५८
स्मात्मानुषोभूत्वाकदाचित्कालपर्ययात्। दरिद्रोव्याधितोमूर्खःकुलहीनश्चजायतइति॥ देयधान्य
परिमाणमाह॥ ॥राज्ञेदत्वातुषड्भागंदेवानांचैवविंशतिं। विप्राणांत्रिंशकंभागंसर्वपापैःप्रमुच्यते॥१२॥
॥ ॥खलेराशौकृतेधान्यात्षष्ठंभागमंशंराज्ञेप्रजापालनाधिकृतायदेवेभ्यश्चविंशतितमंचकारात्पि
तृभ्यश्चविंशतितमंविप्रेभ्यस्त्रिंशकंचभागंदत्वापूर्वोक्तैःपापैःप्रमुच्यतइतिपूर्वोक्तोपसंहारः॥ तथा

चकूर्मः। देवेभ्यश्चपितृभ्यश्चदद्याद्भागंतुविंशकं। त्रिंशद्भागंब्राह्मणानांकृषिंकुर्वन्नदुष्यतीति। बृहस्पति
रपि। राज्ञेदत्वातुषड्भागंदेवानांचैवविंशकं। त्रिंशद्भागंतुविप्राणांकृषिंकुर्वन्नदोषभागिति। विप्रस्येतिकर्त्त
व्यतांकृषिमुक्त्वावर्णांतराणामपितामाह॥ ॥क्षत्रियोपिकृषिंकृत्वादेवान्विप्रांश्चपूजयेत्। वैश्यःशूद्रस्तथाकु
र्यात्कृषिवाणिज्यशिल्पकम्॥१३॥ ॥क्षत्रियवैश्यशूद्राअपिपूर्वोक्तेतिकर्त्तव्यतयाकृषिंकृत्वादेवान्विप्रांश्चका
राद्राजानंपितॄंश्चतथाचयथोक्तभागकल्पनयापूजयेयुः। यद्यपिवैश्यस्यकृषिःपूर्वाध्यायेविहितातथाप्यत्रेतिकर्त्त
व्यताविधानायपुनरुपन्यासः। कृषिवाणिज्यशिल्पकमपितथैवदेवादिभ्योभागंदत्वाजीवनायचत्वारोपिवर्णाः
कुर्युः। वाणिज्यंक्रयविक्रयौ। शिल्पंचित्रलेखनादि। भागकल्पनाचोक्तावृहत्पराशरेणजातेयहचतुर्थांशंवणिग्लाभ
तृतीयकं। कृषितोविंशतिंचैवदद्दतोनास्तिपातकमिति। ननुशूद्रस्यापिकृष्यादिजीवनहेतुसद्भावेकिंपराधीनया
द्विजशुश्रूषयेत्यतआह॥ ॥विकर्मकुर्वतेशूद्राद्विजशुश्रूषयोज्झिताः। भवंत्यल्पायुषस्तेवैनिरयंयांत्यसंशयं॥१४॥ ॥
द्विजशुश्रूषारहिताःशूद्राविकर्मरागद्वेषादिकुर्वंतस्तेतस्त्वल्पायुषोभवंतिअनंतरंनरकंगच्छंतितेनकृष्यादिदर्पलौ
हिकामुष्मिकश्रेयःप्रतिबंधकंद्विजशुश्रूषारहितंनाभ्युपगंतव्यमित्यर्थः। अतएवातुर्यासनिको। रागाद्वेषस्तुमोद

Indira Gandhi National
Centre for the Arts

स्त्रूयारूप्यंवनृशंसता।शाठ्यंवदीर्घवैरत्वमतिमानमनार्जवं।अनृतंचातिवादंचपैशुन्यमतिलोभता।निकृतिश्चापि
२प.टी. वज्ञानंजननेशूद्रमाविशन्।इत्याहपितामहःशूद्रमभिभूतंतुतामसेन।द्विजशुश्रूषणांधर्मंशूद्राणांतुप्रयुक्तवान्।सर्वपरि
६ तामसाभावाःशूद्रस्यद्विजभक्तितः।द्विजशुश्रूषयाशूद्रःपरंश्रेयोधिगच्छति।अहिंसकःशुभाचारोदेवताद्विजपूज
कः।शूद्रोधर्मफलैरिष्टैःस्वधर्मेणैवयुज्यतइतिद्विजशुश्रूषायाःशूद्रदोषाभिभावकत्वमभिहितंउक्तमप्यायार्थेनि
गमयति॥ ॥चतुर्णामपिवर्णानामेषधर्मःसनातनः॥२५॥ ॥ब्राह्मणक्षत्रियवैश्यशूद्राणामेषकृषिवाणिज्यशिल्प
लक्षणोधर्मःसनातनःसर्वेष्वपिकलियुगेषुपारंपर्यागतइति॥गोभिस्त्वमन्यधाराधवलितवपुषःसुलतःकृष्ण ता६
मूर्त्तेश्चारानाथस्याराधवतसहशरुचःकांतिमाराद्धारा।मुक्तादामाभिरामाभिनवमरकतयावमूर्त्तेर्मुकुन्दंगं ६०
श्रुव४ विंदस्याक्रमूत्येसहशमसहशंडिगधनुःधवपुर्नः॥१॥धर्माधिकारिकुलकैरववकाननेंदुश्रीरामपंडितसुतेन
विनायकेन।शास्त्रेपराशरकृतेविवृतौद्वितीयोध्यायःकलावुचितहाक्रिविनिर्णयाय॥२॥ ॥छ॥ ॥इतिश्री
धर्माधिकारिरामपंडितात्मनंदपंडितापरनामधेयविनायकपंडितकृतौपराशरस्मृतिविवृतौविद्वन्म
नोहरायांद्वितीयोध्यायः॥ ॥छ॥ ॥शुभमस्तु॥ ॥छ॥ ॥श्रीरस्तु॥ ॥छ॥ संख्या१५५॥

Indira Gandhi National Centre for the Arts